# Rishigautamaproktam Umamaheshvarabahyapyupacharapujavarnanam

# ऋषिगौतमप्रोक्तं उमामहेश्वरबाह्याप्युपचारपूजावर्णनम्

## Document Information

Text title : Rishigautamaproktam Umamaheshvarabahyapyupacharapujavarnanam

File name : umAmaheshvarabAhyApyupachArapUjAvarNanam.itx

Category : shiva, shivarahasya, pUjA

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 22| 208-248||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# ऋषिगौतमप्रोक्तं उमामहेश्वरबाह्याप्युपचारपूजावर्णनम्

(शिवरहस्यान्तर्गते उग्राख्ये)

**गौतम उवाच**

ततः पुष्पाणि सङ्गृह्य शिवमावाये च्छिवाम् ।
महादेव कृपासिन्धो विश्ववन्द्यपदाम्बुज ॥ २०८॥

आवाहयामि देवेश प्रसीद परमेश्वर ।
लक्ष्म्यादिदेववनितापरिषेवितपादुके ॥ २०९॥

आवाहयामि देवेशि प्रसीद परमेश्वरि ।
गृहाण सोम विश्वात्मन्नासनं रत्ननिर्मितम् ॥ २१०॥

अनन्तासन विश्वेश करुणासागर प्रभो ।
उमे सोमसमाश्लिष्टे सोमार्धकृतशेखरे ॥ २११॥

नानारत्नसमाकीर्णमासनं प्रतिगृह्यताम् ।
अर्घ्यं गृहाणदेवेश सपुष्पं गन्धसंयुतम् ॥ २१२॥

शिवानन्तगुणग्राम सर्वाभीष्टप्रदायक ।
गृहाणार्घ्यं शिवे नित्यं सर्वावयवशोभिनि ॥ २१३॥

शिवप्रिये शिवाकारे नित्यं भक्तवरप्रदे ।
पाद्यं गृहाण गौरीश हेमपात्रस्थितं नवम् ॥ २१४॥

गृहाण देवि पाद्यं त्वं वेदवेदान्तसंस्तुते ।
गृहाणाचमनं शम्भो कल्पितं निर्मल प्रभो ॥ २१५॥

निर्मले निर्मलाकारे गृहाणाचमनीयकम् ।
मधुपर्कं गृहाणेश सच्चिदानन्दविग्रह ॥ २१६॥

मधुपर्कप्रदानेन प्रीतो भव महेश्वर ।

मधुपर्कमिदं देवि स्वीकुरु प्रियशङ्करे ॥ २१७॥

मधुपर्कप्रदानेन प्रीता भव सुशोभने ।
शिव शम्भोऽमृतस्नानं स्वीकुरुष्व कृपानिधे ॥ २१८॥

सर्वतीर्थमय स्वामिन् सर्वपावनपावन ।
शिवे पञ्चामृतस्नानं स्वीकुरुष्व शिवप्रिये ॥ २१९॥

सृष्टतीर्थोत्तमे शुद्धे तीर्थराजनिषेविते ।
शम्भो शुद्धोदकस्नानं स्वीकुरुष्व सुरोत्तम ॥ २२०॥

प्रसीद कृपया भक्तं पाहि मां पार्वतीपते ।
शिवे शुद्धोदकस्नानं गृह्यतां मीनलोचने ॥ २२१॥

प्रसीद देवि दीनं त्वं पाहि मां शरणागतम् ।
सोत्तरीयं सङ्गृहाण दुकूलमिदमुत्तमम् ॥ २२२॥

पाहि पाहि कृपासिन्धो करुणावरुणालय ।
सोत्तरीयं गृहाणेदं दुकूलं शङ्करप्रिये ॥ २२३॥

प्रसीद पाहि मां दीनमनन्यशरणं शिवे ।
उपवीतं गृहाणेश शम्भो चन्द्रार्धशेखर ॥ २२४॥

गृह्यतामुपवीतं यन्नवतन्तुविनिर्मितम् ।
देवि देवाधिदेवेशि यथाशक्त्युपकल्पितम् ॥ २२५॥

गृहाण चन्दनं देव नानागन्धोपकल्पितम् ।
प्रसीद पार्वतीनाथ शरणागतवत्सल ॥ २२६॥

गृहाण चन्दनं देवि कस्तूरीकुङ्कुमाञ्चितम् ।
विश्वं विश्वात्मिके पाहि विश्वनाथप्रिये सदा ॥ २२७॥

गृहाणाभरणानीश निरीश निगमाश्रय ।
विश्वाभरण विश्वेश रत्नाभरणभूषित ॥ २२८॥

गृहाणाभरणान्यम्ब सर्वाभरणभूषिते ।
सर्वप्रिये जगद्वन्द्ये जगदानन्ददे शिवे ॥ २२९॥

गृहाण बिल्वपत्राणि पुष्पाणि च महेश्वर ।
सुगन्धीनि नवानीश सबिल्वकुसुमप्रिय ॥ २३०॥

गृहाण बिल्वपत्राणि नूतनानि शिवप्रिये ।
नागपुन्नागमन्दारमालिकासमलङ्कृते ॥ २३१॥

दशाङ्गं गुग्गुलुं धूपं सगोघृतमनुत्तमम् ।
गृहाण पार्वतीनाथ घ्राणतर्पणमादरात् ॥ २३२॥

दशाङ्गं गुग्गुलुं धूपं सगोघृतमनुत्तमम् ।
गृहाण भक्तवरदे लक्ष्मीवाण्यादिसेविते ॥ २३३॥

साज्यं त्रिवर्तिविस्फूर्जद्दीपं शिव शिवापते ।
गृहाणानन्तसूर्याग्निचन्द्रप्रभ नमोऽस्तु ते ॥ २३४॥

साज्यं त्रिवर्तिविस्पूर्जद्दीपमीशानवल्लभे ।
गृहाण चन्द्रसूर्याग्निमण्डलाधिकसुप्रभे ॥ २३५॥

शम्भो गोघृतसंयुक्तं परमान्नं मनोहरम् ।
सशर्करं गृहाणेश नित्यतृप्त महेश्वर ॥ २३६॥

शिवे गोवृतसंयुक्तं परमान्नं मनोहरम् ।
सशर्करं गृहाणाम्ब परमान्नप्रदायिनि ॥ २३७॥

शम्भो गृहाण गन्धाढ्यमिदमाचमनीयकम् ।
निवेदनान्ते देवेश कल्पितं शुद्धविग्रह ॥ २३८॥

शिवे गृहाण गन्धाढ्यमिदमाचमनीयकम् ।
शुद्धे शुद्धिप्रदे देवि शिववामाङ्गरूपिणि ॥ २३९॥

नीराजनं गृहाणेश बहुदीपविरजितम् ।
स्वप्रकाश प्रकाशात्मन्प्रकाशितदिगन्तर ॥ २४०॥

नीराजनं गृहाणाम्ब सूर्यचन्द्राग्निलोचने ।
प्रभापूरित (सम्पूर्ण) सर्वाङ्गे मङ्गले मङ्गलास्पदे ॥ २४१॥

शम्भो गृहाण ताम्बूलमेलाकर्पूरसंयुतम् ।
प्रसीद भगवन् शम्भो सर्वज्ञामितविक्रम ॥ २४२॥

शिवे गृहाण ताम्बूलमेलाकर्पूरसंयुतम् ।
प्रसीद सस्मिते देवि शिवालिङ्गितविग्रहे ॥ २४३॥

गृहाण परमेशान सरत्ने छत्रचामरे ।
दर्पणं व्यजनं चेश सर्वदुःखविनाशक ॥ २४४॥

गृहाणेमे सुराराध्ये सरत्नेछत्रचामरे ।
दर्पणं व्यजनं चाद्ये विद्याधारे नमोऽस्तु ते ॥ २४५॥

प्रदक्षिणनमस्कारान्गृहाण परमेश्वर ।
नर्तनं च महादेव नाट्यप्रिय नमोऽस्तु ते ॥ २४६॥

प्रदक्षिणनमस्कारान्गृहाण परमेश्वरि ।
नर्तनं च महादेवि शिवनाट्यम्प्रिये शिवे ॥ २४७॥

एवं प्रयत्नतः कृत्वा शिवयोःपूजनं शिवम् ।
शिवं शिवां च यत्नेन पुनः सम्पूजयेत्पुनः ॥ २४८॥

॥ इति शिवरहस्यान्तर्गते ऋषिगौतमप्रोक्तं उमामहेश्वरबाह्याप्युपचारपूजावर्णनं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः २२। २०८-२४८॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 22 . 208-248..

Notes:

Having described about the UmāMaheshvara Dhyānam उमामहेश्वर ध्यानम् as part of the UmāMaheshvara Vrata उमामहेश्वर व्रत, Ṛṣi Gautama ऋषि गौतम further elaborates about the UmāMaheshvara Pūjā उमामहेश्वर पूजा by external means.
In this Chapter 22, Ṛṣi Gautama ऋषि गौतम further details about the UmāMaheshvara AṅgaPūjā उमामहेश्वर अङ्गपूजा with mantra मन्त्र.

Proofread by Ruma Dewan

*Rishigautamaproktam Umamaheshvarabahyapyupacharapujavarnanam*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*